


WWJMRD 2020; 6(7): 58-61
www.wwjmrd.com
*International Journal*
*Peer Reviewed Journal*
*Refereed Journal*
*Indexed Journal*
*Impact Factor MJIF: 4.25*
E-ISSN: 2454-6615

**Dr. Menakarani Sahoo**
Assistant Professor of Sanskrit
P.G. Department of Sanskrit
Shailabala Women's (Auto)
College Cuttack, Odisha, India

**Correspondence:**
**Dr. Menakarani Sahoo**
Assistant Professor of Sanskrit
P.G. Department of Sanskrit
Shailabala Women's (Auto)
College Cuttack, Odisha, India

# Affinity between Music and Sanskrit Literature

## Dr. Menakarani Sahoo

**Abstract**
The art expression in sound in melody and harmony, including both composition and execution is called music. Music is an integral part of our life. Music has a soothing effect on the mental activities like depression, sadness, despair, worries and tensions. Psychologists are applying music therapy to find out the problems in patient and to give relaxation to their imbalanced mind. Man loves the natural sounds such as the whistle of the wind, the hiss of the flames, the gush of water, the thunder of the sky, the sound of the birds. Thus, man was inspired by these sounds. Ancient man designed the first flute from the sound which is emanating from the bamboo read when air passes through its hollows. His Imagination led him to create the concepts of swara and laya from the sounds of nature. Man expresses his feelings, ideas and thoughts through music. Music originated from nada or sound. According to sangeet Ratnakar 'Nada' means prana (or life) and 'Da' means Agni (or energy). Samaveda is considered to be the origin of Indian music. Music accompanies us during every stage of life of a man. A mother was trying to sleep her baby with singing of Lori. The students are praying devotional songs and patriotic song in schools. A musician is doing stage shows by singing his songs. A depressed man loves music. A devotee is chanting the devotional songs by praising his God. The aim of music is basically used to calm one's mind or to excite one's emotions. Because music is the language of emotion which is depicted in Sanskrit Literature.

**Keywords:** ***जग्राह***, श्रुतिजातिविशारदः, ***कीचकाः***, जननान्तरसौहृदानि, हिमनिष्यन्दिनी

***उपक्रमः***

मन एव मनुष्याणां कारणं बन्धमोक्षयोः, मनसा ***ह्ये***व पश्यति, मनसा श्रुणोति, 'इन्द्रियाणां मनश्चास्मि' इत्यादिभिः प्रमाण्यते यत् मनः एव मनुष्यस्य मु***ख्ये***न्द्रियं भवति। मनः सूर्यस्य किरणपेक्षया वेगवद् पवित्रेन्द्रियमिति शिवसंकल्पसूक्ते वर्णितमस्ति। कामः, संकल्पः, संशयः, श्रद्धा, अश्रद्धा, धृतिः, अधृतिः, ह्रिः, धीः भीः इत्ये***तत्स***र्वं मनसः विकारेति बृहदारण्यकोपनिषदि वर्णितमस्ति। कामः अभिलाषः भवति। संकल्पः प्रत्युपस्थितिविषयविकल्पनम्। विचिकित्सा संशयज्ञानम्। श्रद्धा अदृष्टार्थेषु कर्मसु आस्ति***क्य***बुद्धिः । अश्रद्धा तद्विपरीता बुद्धिः । धृतिः धारणम् । अधृतिः तद्विपर्ययः । ह्रीः – लज्जा, धीः प्रज्ञा, भी***त्यादयः*** । अतः मनसः आन्तरिकक्रियाणां सम्यग्परिचालनार्थं मनसः म***नोरञ्जन***मावश्यकं भवति । कवयः मनसः मनोरञ्जनार्थं गीत-नृत्य-वाद्य-क्रीडा-अभिनयादीनां संयोजनं काव्येषु कृतवन्तः। संगीतं विना जीवनस्य परिकल्पनं कर्तुं न शक्यते। भर्तृहरिणैव सङ्गीतस्य महत्त्वं परिकल्पितम् –

> साहित्यसङ्गीतकलाविहीनः साक्षात्पशुः पुच्छविषाणहीनः ।
> तृणं न खादन्नपि जीवमानस्तद्भागधेयं परमं पशूनाम् ॥[i]

शास्त्रेषु सङ्गीतस्य स्थानमनन्यम् । अतः महर्षिजैमिनिना सम्यगुक्तम्– 'गीतिषु सामाख्या'। अतः सामवेदः एव गीतानां निस्यन्दः। श्रीमद्भगवद्गीतायां भगवाता श्रीकृष्णेन स्वीकृतम् यत् सामवेदः एव भगवद्विग्रहेति 'वेदानां सामवेदोऽस्मीति' *।*

***संगीतस्योत्पत्तिः***

वैदिकयुगादेव ***सं***गीतस्य प्ररम्भः अभूत् । यज्ञेषु वेदमन्त्रा एव वीणातन्त्रीझङ्कारपुरस्सरं गीयन्ते स्म । तस्मादेव सामवेदस्य सर्जनमिति पण्डिताः वदन्ति। सामयति तोषयति देवानिति साम। प्राचीनकाले मदमत्तगज-हरिणादीनां वशीकरणं गीतमाध्यमेन क्रियते। भरतमुनेः विरचिते नाट्यशास्त्रे नाट्योत्पत्तेः कथा विद्यते। सांसारिकजना***नां*** दुःखं, क्लेशं दृष्टवा इन्द्रादयः देवाः ब्रह्मणः समीपे गतवन्तः । तत्र तैः ब्रह्मा प्रार्थितः यत् एतेषां पीडितानां कृते कस्यापि अन्यस्य वेदस्य रचना त्वया विधातव्या । ततः परं सुविचार्य चतुर्भ्यः वेदेभ्यः क्रमेण ऋग्वेदात् पाठ्यं, सामवेदात् गीतम्, यजुर्वेदादभिनयम्, अथर्ववेदातद्रसं च गृहीत्वा

नाट्यवेदं ***ब्रह्मा*** रचितवान् ।

जग्राह पाठ्यमृग्वेदात् सामभ्यो गीतमेव च ।
यजुर्वेदादभिनयान् रसनाथर्वणादपि ॥[ii]

***पवनस्य प्रवाहे, नद्याः प्रवाहे, पक्षिणां कूजने, भमरस्य गुञ्जने, पशूनामुन्मादने, प्रपातस्यावतरणे सृष्टध्वनीनामारोहावरोहेषु संगीतं विद्यमानम् । प्रकृत्याः विभिन्नेष्वङ्गेषु सङ्गीतं विद्यमानम् ।***

***संगीतस्य प्रयोजनम्***

**'**विश्रामजननं लोके नाट्यमेतद् भविष्यति**'**- इति भरतमुनिना प्रतिपादितम् । तस्य मतानुसारं दुःखार्त्तानां श्रमार्त्तानां शोकार्त्तानां जनानां विश्रामजननस्य कारणमेव नाट्यम् ।

***दुःखार्त्तानां श्रमार्त्तानां शोकार्त्तानां तपस्विनाम् ।***
***विश्रामजननं लोके नाट्यमेतद् भविष्यति ॥[iii]***

***भारतीयसंस्कृतौ वाद्ययन्त्रं मानवस्य सुखदुःखयोः अभिव्यञ्जकं भवति । समाजे सन्तानजन्मनः समये, नामकरणसंस्कारसमये, उत्सवपालनसमये, विवाहसंस्कारे, नृपाणामभिषेकसमये च वाद्यस्य प्रयोगः क्रियते ।***

***संस्कृतसाहित्यसंगीतयोः सम्बन्धः***

***कामोद्दीपकं संगीतम्***

स्त्रीपुरुषयोः कामोद्दीपकस्य कारणं ***सं***गीतमेव इति कालिदासेन ऋतुसंहारे प्रतिपादितम् –

सवल्लकीकाकलिगीतनिःस्वनै –
र्विबोध्यते सुप्त इवाद्य मन्मथः ॥[iv]

***अर्थात् चन्दनरसेन संसिक्तव्यजनात् समुत्पन्नाः वायुभिः, वीणायाः मधुरध्वनिभिश्च प्रसुप्तः मदनः अधुना समुद्दीप्यते । पुनश्च कालिदासेन प्रोक्तम्-***

सुतन्त्रिगीतं मदनस्य दीपनं
शुचौ निशीथेऽनुभवन्ति कामिनः ॥[v]

***अर्थात् कामासक्ताः मध्यनिशायां सुगन्धितं मनोरमं कान्तायाः वदननिश्वासवायुना उच्छलितं मद्यं पिवन्ति । एचञ्च सुन्दरवीणावाद्यतन्त्रस्य गायनमनुभवन्ति ।***

***ऋषीणां तपसः निवृत्त्यर्थं देवराजः इन्द्रः रम्भोर्वशीमेनकाप्रभृतीनामप्सरसां प्रेरणं कृतवान् । ताः नृत्यमाध्यमेन तेषां महर्षिणां मनसि कामभावस्य जागरणं कृतवत्यः । मेनका महर्षेः विश्वामित्रस्य मनसि कामोन्मादस्य जागरणं कृत्वा तेन सह सम्भोगं कृत्वा शकुन्तलां कन्यारुपेण प्राप्तवती । अनेन प्रतीयते यत् संगीतेन कामस्योद्दीपनं जायते ।***

***मोक्षमार्गस्य साधकं संगीतम्***

***सं***गीतं मोक्षमार्गस्य साधकम् । याज्ञवल्क्यस्मृतौ उक्तमस्ति –

वीणावादनतत्त्वज्ञः श्रुतिजातिविशारदः ।
तालज्ञश्चाप्रयासेन मोक्षमार्गं ***नि***यच्छति ॥[vi]

***सं***गीतमाध्यमेन भगवतः स्तुतिः पवित्रवेदमन्ताणां गानमाध्यमेन क्रियते, अनेन धर्मः लभ्यते *।* अतः ***भगवता प्रतिपादितम्*** – 'मद्भक्ता यत्र गायन्ति तत्र तिष्ठामि नारदः' *।* ***श्रीमद्भागवतमहापुराणानुसारेण भक्तिः नवधा । ताः भवन्ति – श्रवणं, कीर्त्तनं, स्मरणम्, पादसेवनम्, अर्च्चनम्, वन्दनम्, दास्यम्, सख्यम्, आत्मनिवेदनञ्च । कीर्त्तनं तु संगीतस्यैकंरूपम् ।***

पुर्वमेघे संगीत***स्यो***पकरणानां सम्यग्सूचनं कालिदासेन प्रदत्तम् । तत्र पवनैः पूर्यमाणाः कीचकाः मधुरं शष्दायन्ते । अनुरक्ताभिः किन्नरीभिः वनिताभिः शिवस्य त्रिपुरविजयादिमहिमाः गीयन्ते । गिरिगुहासु मेघस्य गर्जितं वाद्यविशेषध्वनिः प्रकाशते । एवं शिवस्य संगीतार्थः समग्रः भविष्यति इति यक्षेण प्रोकतम् –

शब्दायन्ते मधुरमनिलैः कीचकाः पूर्यमाणाः
संरक्ताभिस्त्रिपुरविजयो गीयते किंनरीभिः ।
निर्ह्रादस्ते मुरज इव चेत्कन्दरेषु ध्वनिः स्या**-**
त्संगीतार्थो ननु पशुपतेस्तत्र भावी समग्रः ॥[vii]

देवानां स्तुतिः गानेन क्रियते । उत्तरमेघे किन्नरैः धनपतियशः गीयते । यथा –

अक्षय्यान्तर्भवननिधयः प्रत्यहं रक्तकण्ठै -
रुद्गाय***द्भि***धनपतियशः किन्नरैर्यत्र सार्धम् ।
बैभ्राजा***ख्यं*** विबुधवनितावारमु***ख्या***सहाया
***व***द्धालापा बहिरुपवनं कामिनो निर्विशन्ति ।[viii]

***संगीतेन इन्द्रियवशीकरणम्***

गीतमाध्यमेन इन्द्रयहरणं चैतन्यवशीकरणं चं क्रियते । अस्योदाहरणं आभिज्ञानशाकुन्तले प्राप्यते । यथा -

तवास्मि गीतरागेण हारिणा प्रसभं हृतः ।
एष राजेव दुष्यन्तः सारङ्गेणातिरंहसा ॥[ix]

***अर्थादभिज्ञानशाकुन्तले आर्यायाः मनोहरणशीलेन गीतरागेण अतिवेगवता हरिणा राजा दुष्यन्तः सहसापहृतच्त्तवृत्तिर्जातो अभवत् ।***

***संगीतेन मनसः दमितभावानां प्रकटनम्***

मनसः दमितभावानां प्रकटनमपि ***सं***गीतमाध्यमेन क्रियते । अस्योदाहरणं अभिज्ञानशाकुन्तले प्राप्यते । तत्र हंसपादिका गीतमाध्यमेन स्वान्तर्व्यथां प्रकटयति । ***अतः कालिदासेन प्रोक्तम् -***

अभिनवमधुलोलुपस्त्वं तथा परिचुम्ब्य चूतमञ्जरीम् ।
कमलवसति***मात्र***निर्वृतो मधुकर! विस्मृतोऽस्येनां कथम् ॥[x]

***अर्थात् नूतनपुष्परसतृष्णः दुष्यन्तः यथेच्छं चूतमञ्जरीं समुपभुज्य अधुना कथं कमलं प्रति आसक्तः सन् चूतमञ्जरीं विस्मृतवान् । अर्थात् हंसवतीं विस्मृत्य कमलां प्रति आसक्तोऽभूत् ।***

राजा दुष्यन्तः अभिज्ञानशाकुन्तलस्य पञ्चमाङ्**के** हंसपदिकागानं प्रशंसति – 'अहो रागपरिवाहिणी गीतिः' इति । ***अपिच रम्यवस्तुदर्शनेन मधुरशब्दश्रवणेन प्रियविप्रयोगादिरहितोऽपि प्राणी उत्कण्ठितो भवति । तद्यथा-***

रम्याणि वीक्ष्य मधुरांश्च निशम्य शब्दान्
पर्युत्सुको भवति यत्सुखितोऽपि जन्तुः ।
तच्चेतसा स्मरति नूनमबोधपूर्वं
भावस्थिराणि जननान्तरसौहृदानि ॥[xi]

***रघुवंशे*** यदा रामायणस्य गानमभवत्तदा लवकुशयोः गानं श्रुत्वा सर्वे अश्रुमुखाः संजाताः । रामस्य राजसभा प्रातर्हिमनिष्यन्दिनी वातरहिता वनस्थलीव शुशुभे । अतः कालिदासेन प्रोक्तम् –

तद्गीतश्रवणैकाग्रा संसदश्रुमुखी बभौ ।
हिमनिष्यन्दिनी पातर्निर्वातेव वनस्थली ॥[xii]

***संगीतेमाध्यमेन प्राणिनः वशीकरणम्***

प्राणिनः वशीकरणं ***संगी***नेन भवती***त्य***स्योल्लेखं बाणभट्टेन कादम्बर्यां कृतम्-

> उन्मुक्तकवलेन निश्चलश्रवणपुटेन तन्मुखीभूतेनोद्ग्रीवेणेन्द्रायुधेन प्रथममाकर्णितं श्रुतिसुभगं वीणातन्त्रीझङ्कारमिश्रममानुषं गीतशब्दमशृणोत् ।[xiii]

***कादम्बर्यामिन्द्रायुधः महाश्वेतायाः वीणानिःसृतं सङ्गीतं श्रुत्वा दर्भान् त्यक्तवान् ।***

***विनोदस्य कारणं संगीतम्***

किरातार्जुनीयमहाकाव्ये गीतस्य वर्णनं भारविना कृतम् । यथा –

> पुराऽधिरुढः शयनं महाधनं
> विबोध्यसे यः स्तुतिगीतिमङ्गलैः ।
> अदभ्रदर्भामधिशय्य स स्थलीं
> जहासि निद्रामशिवैः शिवारुतैः ॥[xiv]

अर्थात् किरातार्जुनीयमहाकाव्ये द्रौपदी कथयति – 'हे राजन्! पूर्वं सः (युधिष्ठिरः) ***ब***हुमूल्यायां शय्यायां शयित्वा वैतालिकानां स्तुतिगीतानां मङ्गलध्वनिना जाग्रतोऽस्ति सः अद्य अमङ्गलसूचकैः शृगालीनां ***रवैः*** निद्रां त्यजाति' । अनेन स्पष्टं भवति यत्तस्मिन् काले प्रातः ***सं***गीतं श्रुत्वैव जनाः निद्रां त्यक्तवन्तः ।

रघुवंशमहाकाव्यस्य पञ्चदशसर्गे लवकुशयोः शैशवावस्थायाः अतिक्रान्ते महर्षिः वाल्मीकिः तौ रामायणगानस्य शिक्षां दत्तवान् । तौ सुतौ मातुः सीतायाः अग्रतः मधुरं गायन्तौ तस्याः रामविरहवेदनां किञ्चित् लघुकृतवन्तौ । अतः कालिदासेन प्रोक्तम् –

> रामस्य मधुरं वृत्तं गायन्तौ मातुरग्रतः ।
> तद्वियोगव्यथां किंचिच्छिथिलाचक्रतुः सुतौ ॥[xv]

गीतस्य वृत्तं, गीतस्य रचयिता, गीतस्य गायकः – एतेषां समागमः यदि सम्यग् भवति तर्हि गीतमवश्यमेव मनः हर्तुमर्हति । अतः रघुवंशे कालिदासेन प्रोक्तम् –

> वृत्तं रामस्य वाल्मीकेः कृतिस्तौ किंन्नरस्वनौ ।
> किं तद्येन मनो हर्तुमलं स्यातां न शृण्वताम् ॥[xvi]

अर्थात् रामायणस्य वृत्तं रामकथाधारितम्, रचयिता महर्षिः वाल्मीकिः, गायकौ किन्नरकण्ठौ कुशलवौ भवतः तर्हि गीतं शृण्वतां मनो हर्तुमलमत्र न संशयः ।

**'कोकिलानां स्वरं रुप*म्'* इति** न्यायेन वसन्तऋतौ यथा कोकिलः सुमधुरस्वरेण कामीपुरुषाणां चित्तमा***ह्ला***दयति तथैव संगीतमेव सर्वेषां मनांसि हरतीति ऋतुसंहारे उक्तमस्ति । यथा –

> यत्कोकिलः पुनरयं मधुरैर्वचोभि –
> र्यूनां मनः सुवदनानिहितं ***नि***हन्ति ।[xvii]

विरहकाले मनोविनोदस्य एकमेव साधनं भवति । तत् संगीतमेव । अस्य प्रमाणं कालिदासस्योत्तरमेघे प्राप्यते । उत्तरमेघे यक्षिणी संगीतमाध्यमेन आत्मनः मनः रञ्जयति स्म । अतः कालिदासेन प्रोक्तम् –

> उत्सङ्गे वा मलिनवसने सौम्य । निक्षिप्य वीणां
> मद्गोत्राङ्कं विरचितपदं गेयमुद्गातुकामा ।
> तन्त्रीमाद्रां नयनसलि***लैः*** सारयित्वा कथंचिद्
> भूयो भूयः स्वयमपि कृतां मूर्च्छनां विस्मरन्ती ॥[xviii]

***निष्कर्षः***

दुःखदावाग्निदग्धस्य आधिव्याधिप्रपीडितस्य मायामोहभ्रान्तचेतसः मानवस्य सन्तापनिवारणाय तत्त्वज्ञाः काव्यनामकं रत्नं रचितवन्तः । य***तोहि*** काव्यं साक्षात्मानवमनसः प्रतिविम्बात्मकम् । य***च्छ्रु***त्वा मानवाः आत्मशान्तिमधिगच्छन्ति *।* संगीतस्य मूल्यं कोऽपि दातुं न श***क्नो***ति । यतः तस्य मूल्यं धनेन न तुल्यते । रघुवंशे लवकुशयोः व्यवहारेण एतत्प्रमाणितमभवत् । यथा –

> उभयोर्न तथा लोकः प्रावीण्येन विसिष्मिये ।
> नृपतेः प्रीतिदानेषु वीतस्पृहतया यथा ॥[xix]

अर्थात् रामायणस्य गायनादनन्तरं यदा रामः प्रेम्णा यद्दानं दत्तवान् तत्ततौ प्रतिदानस्वरुपं रामस्य समीपे पुनः समर्पितवन्तौ ***। यतोहि संगीतं प्रकृतेः दानम् । अतः गीयते –***

> ***पंछी सुर में गाते हैं भँवरे गुनगुनाते हैं***
> ***घुँघरू बजाती है हवा***
> ***ऐसे मुस्कुराती है युं फिजा बुलाती है***
> ***जैसे हो ये मेरी दिलरुबा ।***

---

1. त्रिपाठी, डॉ० श्रीकृष्णमणि : भर्तृहरिशतकत्रयम्, चौखम्बा विद्याभवन, वाराणसी, २००८, पृ-२४
2. शास्त्री, श्री बाबूलाल शुक्ल (वि० सं० २०६७) : नाट्यशास्त्रम्, चौखम्बा संस्कृत संस्थान, वाराणसी, पृ-६
3. शास्त्री, श्री बाबूलाल शुक्ल (वि० सं० २०६७): नाट्यशास्त्रम्, चौखम्बा संस्कृत संस्थान, वाराणसी, पृ-२८
4. नन्दशर्मा, श्री चन्द्रशेखर (१९८५): ऋतुसंहारम्, धर्मग्रन्थ ष्टोर, अलिशा बाजार, कटक, ओडिशा, पृ -८
5. नन्दशर्मा, श्री चन्द्रशेखर (१९८५): ऋतुसंहारम्, धर्मग्रन्थ ष्टोर, अलिशा बाजार, कटक, ओडिशा, पृ-३
6. पाण्डेय, डॉ० उमेशचन्द्र (वि० सं० २०६५) : याज्ञवल्क्यस्मृतिः, चौखम्बा संस्कृत संस्थान, वाराणसी, पृ- ४६५
7. मिश्र, डॉ० व्रजसुन्दर (१९९९): मेघदूत, विद्यापुरी, वालुबाजार, कटक, ओडिशा, पृ-२९३
8. पाढी, डॉ० प्रमोदकुमार (२०१६): कालिदासविरचितं मेघदूतम्, किताब महल, कटक, ओडिशा, पृ- २९८
9. राय, डॉ० गङ्गासागर (वि.सं.२०६५) : महाकविविरचितम् अभिज्ञानशाकुन्तलम्, चौखम्बा संस्कृत संस्थान, वाराणसी, पृ-१२
10. राय, डॉ० गङ्गासागर (वि.सं.२०६५) : महाकविविरचितम् अभिज्ञानशाकुन्तलम्, चौखम्बा संस्कृत संस्थान, वाराणसी, पृ-२२३
11. राय, डॉ० गङ्गासागर (वि.सं.२०६५) : महाकविविरचितम् अभिज्ञानशाकुन्तलम्, चौखम्बा संस्कृत संस्थान, वाराणसी, पृ-२२५

12. त्रिपाठी, डॉ० श्रीकृष्णमिश्रः (२०१२) : महाकविकालिदासविरचितं रघुवंशम्, चौखम्बा सुरभारती प्रकाशन, वाराणसी, , पृ- ५१७
13. शास्त्री, श्री कृष्णमोहन (वि.सं. २०५२): बाणभट्टकृता कादम्बरी, चौखम्बा संस्कृत संस्थान, वाराणसी, पृ-३८१
14. मिश्रः, श्रीबदरीनारायण (२०१२): महाकविभारविप्रणीतं किरातार्जुनीयम्, चौखम्बा सुरभारती प्रकाशन, वाराणसी, पृ-२७
15. त्रिपाठी, डॉ० श्रीकृष्णमिश्रः (२०१२) : महाकविकालिदासविरचितं रघुवंशम्, चौखम्बा सुरभारती प्रकाशन, वाराणसी, , पृ- ५०७
16. त्रिपाठी, डॉ० श्रीकृष्णमिश्रः (२०१२) : महाकविकालिदासविरचितं रघुवंशम्, चौखम्बा सुरभारती प्रकाशन, वाराणसी, , पृ- ५१६
17. नन्दशर्मा, श्री चन्द्रशेखर (१९८५): ऋतुसंहारम्, धर्मग्रन्थ ष्टोर, अलिशा बाजार, कटक, ओडिशा, पृ-१४७
18. पाढी, डॉ० प्रमोदकुमार (२०१६): कालिदासविरचितं मेघदूतम्, किताब महल, कटक, ओडिशा, पृ-३११
19. त्रिपाठी, डॉ० श्रीकृष्णमिश्रः (२०१२) : महाकविकालिदासविरचितं रघुवंशम्, चौखम्बा सुरभारती प्रकाशन, वाराणसी, , पृ- ५१९

## References


1. अमरसिंह-प्रणीतः, अमरकोषः— संक्षिप्त माहेश्वरी टीका सहित, दशम संस्करण, निर्णय सागर प्रकाशन, मुम्बई, १९६९ ई०
2. त्रिपाठी, डॉ० श्रीकृष्णमणि : भर्तृहरिशतकत्रयम्, चौखम्बा विद्याभवन, वाराणसी,२००८
3. त्रिपाठी, डॉ० श्रीकृष्णमिश्रः: महाकविकालिदासविरचितं रघुवंशम्, चौखम्बा सुरभारती प्रकाशन, वाराणसी, २०१२
4. नन्दशर्मा, श्री चन्द्रशेखरः ऋतुसंहारम्, धर्मग्रन्थ ष्टोर, अलिशा बाजार, कटक, ओडिशा, १९८५
5. पाढी, डॉ० प्रमोदकुमारः कालिदासविरचितं मेघदूतम्, किताब महल, कटक, ओडिशा, २०१६
6. पाण्डेय, डॉ० उमेशचन्द्र : याज्ञवल्क्यस्मृतिः, चौखम्बा संस्कृत संस्थान, वाराणसी, वि० सं० २०६५
7. मिश्र, डॉ० ब्रजसुन्दरः मेघदूत, विद्यापुरी, वालुबाजार, कटक, ओडिशा, १९९९
8. मिश्रः, श्रीबदरीनारायण : महाकविभारविप्रणीतं किरातार्जुनीयम्, चौखम्बा सुरभारती प्रकाशन, वाराणसी, २०१२
9. राय, डॉ० गङ्गासागर : महाकविविरचितम् अभिज्ञानशाकुन्तलम्, चौखम्बा संस्कृत संस्थान, वाराणसी, वि.सं.२०६५
10. शास्त्री, श्री कृष्णमोहनः बाणभट्टकृता कादम्बरी, चौखम्बा संस्कृत संस्थान, वाराणसी, वि.सं. २०५२.
11. शास्त्री, श्री बाबूलाल शुक्ल : नाट्यशास्त्रम्, चौखम्बा संस्कृत संस्थान, वाराणसी, वि० सं० २०६७